तायते । सिद्धमा मनोतायाः कृत्वा मनोतामनुद्रुत्य पशोरवदानानि संमृश्यौदुम्बरे पात्रे यूष्णो मृत्युग्रहं गृह्णाति विपश्चिते पवमानाय गायतेत्यनुद्रुत्योपयामगृहीतो ऽसि मृत्यवे त्वा जुष्टं गृह्णामीति । दर्भैः परिमृज्योत्तरवेद्याꣳ सꣳसादयत्येष ते योनिर्मृत्यवे त्वेति । अथ पशुना चरति। अथ वनस्पतिना चरति । अथ पुरस्तात्स्विष्टकृतो ऽथैतं ग्रहꣳ होष्यन्नप उपस्पृशति विद्युदसि विद्य मे पाप्मानमिति । अथ जुहोत्यप मृत्युप क्षुधमपेतः शपथं जहि। अधा नो अग्न आवह रायस्पोषꣳ सहस्रिणम् ॥ ये ते सहस्रमयुतं पाशा मृत्यो मर्त्याय हन्तवे । तान्यज्ञस्य मायया सर्वानवयजामहे स्वाहेति । अथ हुत्वोपस्पृशेद्वृष्टिरसि वृश्च मे पाप्मानमिति। अथ स्विष्टकृता चरति । उपहूयमानायामिडायामुप गृह्णन्ति ग्रहमुपहूतं ग्रहं यजमानो भक्षयति भक्षो ऽस्यमृतभक्षस्तस्य ते मृत्युपीतस्यामृतवतः स्वगाकृतस्य मधुमत उपहूतस्योपहूतो भक्षया-मीति । भक्षयित्वात्मानं प्रत्यभिमृशते मन्द्राभिभूतिः केतुर्यज्ञानामित्यान्तादनु-

svāhā; to Jyotiṣmatya svāhā; to Rājan svāhā; to Virājan svāhā; to Samrāj svāhā; to Svarājan svāhā; to Śūṣa svāhā; to Sūrya svāhā; to Candramas svāhā; —to Jyotis svāhā; to Saṁsarpa svāhā; to Kalyāṇa svāhā; to Arjuna svāhā."[6] Having made each offering, he puts the drop into the folded palms of the sacrificer. The sacrificer besmears his face with them with the Anuvāka, "Rājñī, Virājñī, Samrājñī, Svarājñī, Arcis, Śocis, Tapas, Haras, Bhā, Agni, Indra, Bṛhaspati, Viśve Devas, guardians of the world—may all these grant me glory."[7]

The procedure of the animal-sacrifice beginning with the second tracing of the altar is then gone through. Having gone through the rite up to the Manotā, having gone along the Manotā hymn, having touched together the portions of the cooked organs of the animal, he takes up the draught of broth for Mṛtyu in a pot of *Ficus glomerata*, first having gone along the verse, "Do you praise the wise (draught) passing through. It glides over the food like a big stream. It crawls like a serpent leaving out its worn out skin. The tawny bull passes like a sporting horse,"[8] with the formula, "Thou art taken with a support; I take thee dear to Mṛtyu."[8] Having wiped around with Darbha-blades, he places it on the Uttaravedi with the formula, "This is thy birth-place, for Mṛtyu thee."[8] He goes through the procedure of the offering of the cooked organs of the animal. He makes an offering to Vanaspati. When he is going to offer the draught prior to the Sviṣṭakṛt-offering, he should touch water with the formula, "Thou art remover; do thou remove my evil."[9] He makes an offering with the mantras, "O Agni, do thou destroy death, do thou destroy hunger, do thou destroy the curse from here. And do thou, O Agni, bring us thousandfold prosperity of wealth. —O Mṛtyu, we remove through offering through the power of sacrifice thy thousand and ten thousand bonds intended for the death of man, svāhā."[10] Having offered, he should touch (water) with the formula, "Thou art smiter; do thou smite my evil."[9] He then makes the Sviṣṭakṛt offering. While the Iḍā is being invoked, the draught is taken. The sacrificer consumes the draught for which consent has been obtained, with the formula, "Thou art the food, food for immortality. I who have obtained consent, consume thee who art consumed by Mṛtyu, possessing ambrosia, well obtained, sweet and for whom consent has been obtained."[11] Having consumed, he touches himself with the remaining part of the Anuvāka,[12] beginning with "(The speech) is sweet, assaulting, sign of comprehension ...."

6. TBr III.10.7
7. TBr III.10.6
8. TBr III.10.8.1
9. TBr III.10.9.2
10. TBr III.10.8.1
11. TBr III.10.8.2
12. TBr III.10.8

वाकस्य । अनूयाजप्रभृति पाशुबन्धिकं कर्म तायते । सिद्धमा दक्षिणानां कालात् । दक्षिणानां काले धेनुमृषभमनड्वाहं दत्त्वैकविंशतिर्दक्षिणा ददाति शतं ददाति सहस्रं ददात्यन्विष्टकं दक्षिणा ददाति । यदि न विन्देत मन्थानेतावतो दद्यादोदनान्वा । पष्ठौहीं त्वन्तर्वतीं दद्याद्धिरण्यं ददाति वासो ददाति । तेनायुः प्रतिरत इति ब्राह्मणम् । तं चेत्सौम्ये ऽध्वरे चिन्वीत प्रथमायामुपसदि क्षेत्रकरणं मध्यमोत्तमे उपसदावन्तरेणोपधानं काले ऽग्निप्रणयनं दक्षिणानां काले दक्षिणाः सवनीयस्य यूष्णो मृत्युग्रहः । तं चेदहीने सत्रे वा चिन्वीत प्रथमे ऽहनि दक्षिणाः प्रथमे ऽहनि यूष्णो मृत्युग्रहः । न सत्रे दक्षिणा नीयन्ते । नाचिकेत एव मृत्युग्रहः स्यादित्येतद-परम् । अग्निं चित्वा सौत्रामण्या यजेत मैत्रावरुण्यामिक्षया वेति । तस्यै सायमग्निहोत्रे हुते सायंदोहः प्रातरग्निहोत्रे हुते प्रातर्दोहः । पशुपुरोडाशेन सह श्रपणम् । असमुदिते चर्या। संतिष्ठते सावित्रः ॥ ५ ॥ तृतीयः ॥

अथ नाचिकेतस्य । प्रसिद्धं क्षेत्रकरणं यथा सावित्रस्य । एतावदेव नाना । नात्र लेखा भवन्ति । अथ याजुषीरुपदधाति लोको ऽसि स्वर्गो ऽसीत्यञ्जलिनैकविंशतिं यथा निपतन्ति तास्तत्रतत्रोपदधाति।

The procedure relating to the animal-sacrifice beginning with the Anuyājas is gone through. The procedure up to the giving away of Dakṣiṇās is as prescribed. At the time of giving Dakṣiṇās the sacrificer gives away a milch-cow, a bull and twentyone cows; or a hundred; or a thousand; he gives as many as the bricks. If he is unable to obtain (that much number of cows), he gives as many pots of flour of parched barley mixed with honey, or pots of cooked rice. He should give a pregnant heifer, he gives gold, he gives a piece of cloth; thereby his life is prolonged. So says the Brāhmaṇa.

If one piles up (the Sāvitra Citi) in a Soma-sacrifice, preparation of the ground takes place on the first Upasad day. Bricks are piled up inbetween the middle and the last Upasads. Fire is carried forth at the proper time. Dakṣiṇas are given away at the prescribed time. At the Savanīya animal-sacrifice the draught of broth is offered to Mṛtyu. If one piles up (the Sāvitra Citi) in an Ahīna sacrifice or a Sattra, the Dakṣiṇās are given away on the first day, the draught of broth for Mṛtyu is offered on the first day. Dakṣiṇās are not given away in a Sattra. The draught for Mṛtyu is offered only in the Nāciketa Citi. This is another view. After having piled up Agni, one should perform a Sautrāmaṇī sacrifice or one should offer Āmikṣā to Mitra-Varuṇa. (In the event of the Āmikṣā) evening milking should take place after the evening Agnihotra-offering, and morning milking should take place after the morning Agnihotra-offering. (The morning milk) should be heated while baking the Paśupuroḍaśa. (The Āmikṣā) should be offered before the conversation (between the Adhvaryu and the Āgnīdhra at the Śaṁyuvāka). The Sāvitra Cayana comes to a close.

## XIX.6

### NĀCIKETA

Now (the rite) of the Nāciketa Citi. The preparation of the area is as prescribed for the Sāvitra. This much is different: Here there are no lines. He piles up by means of the folded palms twentyone bricks with formulas at those very places where they fall. (The formulas are):

(i) "O Agni (in the form of the bricks) thou art the world, thou art the heaven, thou art endless, thou art boundless, thou art uninjured, thou art inviolable, foundation of penance, this (world is) within thee, all venerable, all creation, all resulting from creation, feeder of all, creator of all, I pile thee up fulfiller of desires, non-injured. May Prajāpati place thee. Do thou (favoured) by the divinity be seated firm in the manner of Aṅgiras.

(ii) Thou art the penance resorted in the earth-fire, foundation of splendour...

(iii) Thou art splendour, resorted in penance, foundation of the ocean ...

तदेतदन्यत्रापि प्रकीर्णानामुपधानस्य निदानम्। यदि पाङ्क्ः पञ्च पुरस्तात्पञ्च दक्षिणतः पञ्च पश्चात्पञ्चोत्तरत एकां मध्ये । अथ यदि त्रिवृत्सप्त पुरस्तात्तिस्रो दक्षिणतः सप्त पश्चात्तिस्र उत्तरत एकां मध्ये। अथ यदूर्ध्वाः पश्चात्कोट्याः प्रभृत्यूर्ध्वा आ स्वयमातृण्णावकाशादथ यदि प्राचीः स्वयमातृण्णावकाशात्प्रभृति प्राचीः स्वयमातृण्णाभ्यः प्रभृति सिद्धमत ऊर्ध्वꣳ स यदीच्छेत्तेजस्वी यशस्वी ब्रह्मवर्चसी स्यामिति प्राङ होतुर्धिष्ण्यादुत्सर्पेदित्याहवनीयसकाशात्। येयं प्रागाद्यशस्वती सा मा प्रोर्णोतु तेजसा यशसा ब्रह्मवर्चसेनेति। तेजस्व्येव यशस्वी ब्रह्मवर्चसी भवतीति। अथ यदीच्छेद्भूयिष्ठं मे श्रद्दधीरन्भूयिष्ठा दक्षिणा नयेयुरिति

(iv) Thou art the ocean resorted in the splendour, foundation of waters ...
(v) Yo are waters resorted in the ocean, foundation of the earth ...
(vi) Thou art earth resorted in waters, foundation of fire ...
(vii) Thou art fire resorted in the earth, foundation of the midregion ...
(viii) Thou art the midregion resorted in the fire, foundation of wind ...
(ix) Thou art wind resorted in the midregion, foundation of the sky ...
(x) Thou art the sky resorted in the wind, foundation of the sun ...
(xi) Thou art the sun resorted in the sky, foundation of the moon ...
(xii) Thou art the moon resorted in the sun, foundation of the stars ...
(xiii) You are stars resorted in the moon, foundation of the year ...
(xiv) Thou art the year resorted in the stars, foundation of seasons ...
(xv) You are seasons resorted in the year, foundation of months ...
(xvi) You are months resorted in the seasons, foundation of fortnights ...
(xvii) You are fortnights resorted in the months, foundation of days and nights ...
(xviii) You are day and night resorted in the fortnights, foundations of the past and present ...
(xix) You are the full-moon, the eighth day and the new-moon, you are givers of food, yielding food ...
(xx) Thou art the great Rāj, thou art the grace, the guardian of Indra, the guardian of law, born after all creation ...
(xxi) Thou art vigour, thou art might, thou art strength, thou art lustre, the immortal dwelling place of gods, the immortal one born of penance ..."[1]

This practice is applicable even in other cases involving the piling up of miscellaneous (bricks). If the Cayana is Pāṅkta, one should pile five towards the east, five towards the south, five towards the west, five towards the north and one in the middle. If thrice seven, seven towards the east, three towards the south, seven towards the west, three towards the north, and one in the middle. If (the bricks are to be piled up) elevated, they should be elevated from the rear line upto the space for the naturally perforated stones. If turning eastwards, they should be eastward from the space for the naturally perforated stones. The piling from the naturally perforated stones takes place as prescribed. "If the sacrificer desires that he may become resplendent, glorious and pre-eminent in sacred knowledge, he should leap eastwards from the Hotṛ's mound upto the Āhavanīya with the formula, "The glorious divinity which proceeded eastwards, may it provide me with splendour, glory and pre-eminence in sacred knowledge." He becomes resplendent, glorious and pre-eminent in sacred knowledge. If he further desires that all should have full faith in him and the priests should carry Dakṣiṇās in large quantity, he should offer

1. TBr III.11.1

दक्षिणासु नीयमानासु प्राच्येहि प्राच्येहीति प्राची जुषाणा वेत्वाज्यस्य स्वाहेति स्रुवेणोपहत्याहवनीये जुहुयात् । भूयिष्ठमेवास्मै श्रद्दधते भूयिष्ठा दक्षिणा नयन्तीति ब्राह्मणम् । संतिष्ठते नाचिकेतः ॥ ६ ॥ चतुर्थः ॥

अथ ब्रह्मचितः । प्रसिद्धं क्षेत्रकरणं यथा सावित्रस्यैतावदेव नाना । नात्र लेखा भवन्त्यथ पुरस्तादुदीचीर्दशहोत्रेष्टका उपदधाति चित्तिः स्रुक्तया देवतयाङ्गिरस्वद्ध्रुवा सीद चित्तमाज्यं तया देवतयाङ्गिरस्वद्ध्रुवा सीदेति दश । अथ हृदयेष्टकामुपदधाति सुवर्णं घर्मं परिवेद वेनमित्यनुद्रुत्य देवैः स मानसीन आत्मा जनानामित्यातः । अथ यजुरिष्टके उप-दधात्यग्निर्यजुर्भिस्तया देवतयाङ्गिरस्वद्ध्रुवा सीद सविता स्तोमैस्तया देवतयाङ्गिरस्वद्ध्रुवा सीदेति । अथ पत्नीष्टके उपदधाति सेनेन्द्रस्य तया देवतयाङ्गिरस्वद्ध्रुवा सीद धेना बृहस्पतेस्तया देवतयाङ्गिरस्वद्ध्रुवा सीदेति । सर्वासां पारे सूददोहसः करोति । अथ दक्षिणतः प्राचीश्चतुर्होत्रेष्टका उपदधाति पृथिवी होता तया देवतयाङ्गिरस्वद्ध्रुवा सीद द्यौरध्वर्युस्तया देवतयाङ्गिरस्वद्ध्रुवा सीदेति चतस्रः । अथ हृदयेष्टकामुपदधाति

a spoonful on the Āhavanīya with the formula, "Do thou go eastwards, do thou go eastwards; may (the divinity) going eastwards and gladdened, partake of the clarified butter, svāhā." "They have full faith in him; the priests carry away Dakṣiṇā in large quantity." So says the Brāhmaṇa.[2] The Nāciketa Cayana comes to an end.

## XIX.7

### BRAHMACIT

Now the rite of the Brahmacit. The preparation of the ara is as prescribed for the Sāvitra Cayana. This much is different: There are no lines herein. He piles up ten bricks in the east ending towards the north with the Daśahotṛ formulas, "Comprehension is the spoon, governed by that divinity, do thou be seated firm in the manner of Aṅgiras; comprehension is clarified butter; governed by that divinity, do thou be seated firm in the manner of the Aṅgiras," etc. He piles up the Hṛdaya brick with the formula, "I have cognised the soul of Indra, having golden splendour, bright, beautiful, expressed in ten ways. The Brahman obtained the divinity exposed in the Daśahotṛ formulas moving mentally in the ocean (of the world). Entered within, controller of men, being singular, he moves in numerous forms, in whom a hundred bright things are united, for whom all divine songs become united, in whom all offerers become united, he is the soul of all men and is to be obtained through balanced mind. Entered within, controller of all men, residing in all, in whom all progeny becomes united, in whom together with the gods the Caturhotṛ formulas become accomplished, he the soul of men is to be obtained through balanced mind."[1]

He piles up two Yajus-bricks respectively with the formulas, "Agni wth the Yajus; governed by that divinity, do thou be seated firm in the manner of Aṅgiras. Savitṛ with Stomas; governed by that divinity do thou be seated firm in the manner of Aṅgiras."[2] He piles up two Patnī-bricks respectively with the formulas, "The army of Indra; governed by that divinity do thou be seated firm. Speech of Bṛhaspati, governed by that divinity, do thou be seated firm in the manner of Aṅgiras." At the end of the piling up of all, he recites the *sdadohas* verse.

Towards the south he piles up four Caturhotṛ-bricks ending towards the east with the formulas, "Pṛthivī is the Hotṛ; governed by that divinity, do thou be seated firm in the manner of Aṅgiras. Dyaus is the Adhvaryu, governed by that divinity do thou become firm in the manner of Aṅgiras." He piles up the Hṛdaya-brick with the formulas, "The Brahman obtained through penance, Indra Agni the formation of

2. TBr III.11.9.8

1. TĀ III.11.1
2. TĀ III.8.1

ब्रह्मेन्द्रमग्निमित्यनुद्रुत्य यज्ञमेतं चतुर्होतॄणामात्मानं कवयो निचिक्यु-रित्यातः। अथ यजुरिष्टके उपदधातीन्द्र उक्थामदैस्तया देवतयाङ्गिरस्वद्ध्रुवा सीद मित्रावरुणावाशिषा तया देवतयाङ्गिरस्वद्ध्रुवा सीदेति । अथ पत्नीष्टके उपदधाति पथ्या पूष्णस्तया देवतयाङ्गिरस्वद्ध्रुवा सीद वाग्वायोस्तया देवतयाङ्गिरस्वद्ध्रुवा सीदेति । सर्वासां पारे सूददोहसः करोति । अथ पश्चादुदीचीः पञ्चहोत्रेष्टका उपदधात्यग्निर्होता तया देवतयाङ्गिरस्वद्ध्रुवा सीदाश्विनाध्वर्यू तया देवतयाङ्गिरस्वद्ध्रुवा सीदेति चतस्रः । अपि वाश्विनाध्वर्यू इत्येतेनैव मन्त्रेण द्वे इष्टके समानतयादेवते उपदधाति । तया देवतयाङ्गिरस्वद्ध्रुवे सीदतमिति मन्त्रꣳ संनमयति । अथ हृदयेष्टकामुपदधाति शतं नियुतः परिवेदेत्यनुद्रुत्य प्राणमुल्बं तेन क्लृप्तो ऽमृतेनाहमस्मीत्यातः । अथ यजुरिष्टके उपदधात्यङ्गिरसो धिष्णि-यैरग्निभिस्तया देवतयाङ्गिरस्वद्ध्रुवा सीद मरुतः सदोहविर्धानाभ्यां तया देवतयाङ्गिरस्वद्ध्रुवा सीदेति । अथ पत्नीष्टके उपदधाति दीक्षा सोमस्य। तया देवतयाङ्गिरस्वद्ध्रुवा सीद पृथिव्यग्नेस्तया देवतयाङ्गिरस्वद्ध्रुवा सीदेति । सर्वासां पारे सूददोहसः करोति । अथोत्तरतः प्राचीः षड्ढोत्रेष्टका उपदधाति वाग्घोता तया देवतयाङ्गिरस्वद्ध्रुवा सीद दीक्षा पत्नी तया देवतयाङ्गिरस्वद्ध्रुवा सीदेति षट् । अथ हृदयेष्टकामुपदधाति सुवर्णं कोशꣳ रजसा परीवृतमित्यनुद्रुत्येन्द्रस्यात्मानꣳ शतधा चरन्तमित्यातः । अथ यजुरिष्टके उपदधात्यापः प्रोक्षणीभिस्तया देवतयाङ्गिरस्वद्ध्रुवा सीदौषधयो बर्हिषा तया देवतयाङ्गिरस्वद्ध्रुवा सीदेति । अथ पत्नीष्टके

the world, Savitṛ the sou of the sky, Bṛhaspati, the Caturhotṛ formula the essence of speech encompassing all the quarters.—The wise defined the supreme being residing within, the active, Tvaṣṭṛ fashioning the different forms, proficient, the vital breath promulgated by the immortal being, bearing the concrete form of sacrifice and the essence of the Caturhotṛ formula.—The wise defined the supreme being, residing within, the active, related to the gods, residing in the internal organs, accomplished by the eternal, bearing the concrete form of sacrifice, and the essence of the Caturhotṛ formula."[4] He places two Yajus-bricks respectively with the formulas, "Indra with the praise, governed by that divinity, do thou be seated firm in the manner of Aṅgiras. Mitra-Varuṇa with the benediction, governed by that divinity, do thou be seated firm in the manner of Aṅgiras."[2] He piles up two Patnī-bricks respectively with the formulas, "Paṭhyā (is the wife) of Pūṣan; governed by that divinity, do thou be seated firm in the manner of Aṅgiras; Vāg of Vāyu; governed by that divinity, do thou be seated firm in the manner of Aṅgiras."[3] At the end of piling up of all he recites the *sudadohas* veres.

To the west he piles up four Pañcahotṛ bricks ending towards the north respectively with the formulas, "Agni is the Hotṛ; governed by that divinity do thou be seated firm in the manner of Aṅgiras; Aśvins are the two Adhvaryus; governed by that divinity do thou be seated firm in the manner of Aṅgiras," etc.[5] Or he piles up two bricks with the single formula, "Aśvins are the two Adhvaryus ..." with a common *tayādevata* formula; he modifies the formula as *tayādevatayā'ṅgirasvad dhruve sīdatam.* He piles up the Hṛdaya-brick with the mantra, "The supreme being chosen by all is aware of a hundred mares. He encompasses all this. He is the soul of Indra, the Pañcahotṛ formula with inner meaning. (He grants) immortality to gods and long life to the progeny. The wise defined Indra the ruler, the Savitṛ, the soul of Vāyu. The wise deem him as the highest ray shining among the rays in the realm of the holy order. He maintains the universe in the egg. Being undivided, he gazes at the worlds. His egg is said to be mighty, and the vital breath to be the vulva. I am fashioned out by that immortal being."[6] He piles up two Yajus-bricks respectively with the formulas, "Aṅgirases together with the Dhaṣṇiya fires; governed by that divinity, do thou be seated firm in the manner of Aṅgiras. Maruts together with the Sadaṣ and the Havirdhāna; governed by that divinity, do thou be seated firm in the manner of Aṅgiras."[2] He piles up the two Patnī-bricks respectively with the two formulas, "Dīkṣā is the wife of Soma; governed by that divinity do thou

3. TĀ III.9.1
4. TĀ III.11.2.3
5. TĀ III.3.3
6. TĀ III.11.4

उपदधाति वसूनां गायत्री तया देवतयाङ्गिरस्वद्ध्रुवा सीद रुद्राणां त्रिष्टुक्तया देवतयाङ्गिरस्वद्ध्रुवा सीदेति । सर्वासां पारे सूददोहस: करोति । अथोपरिष्टात्प्राची: सप्तहोत्रेष्टका उपदधाति महाहविर्होता तया देवतयाङ्गिरस्वद्ध्रुवा सीद सत्यहविरध्वर्युस्तया देवतयाङ्गिरस्वद्ध्रुवा सीदेति षट् । अपि वानाधृष्यश्चाप्रतिधृष्यश्च यज्ञस्याभिगरावित्येतेन मन्त्रेण द्वे इष्टके समानतयादेवते उपदधाति । तया देवतयाङ्गिरस्वद्ध्रुवे सीदतमिति मन्त्रꣳ संनमयति । अथ हृदयेष्टकामुपदधातीन्द्रो राजा जगतो य ईश इत्यान्तादनुवाकस्य । अथ यजुरिष्टका उपदधात्यदितिर्वेद्या तया

be seated firm in the manner of Aṅgiras. Pṛthivī is the wife of Agni; governed by that divinity, do thou be seated firm in the manner of Aṅgiras." At the end of the piling up of all, he recites the *sudadohas* verse.

Towards the north he piles up six Ṣaḍḍhotṛ - bricks ending towards the east respectively wit the formulas beginning with "Vāk is the Hotṛ; governed by that divinity, do thou be seated firm in the manner of Aṅgiras. Dīkṣā is the (sacrificer's) wife; governed by that divinity, do thou be seated firm in the manner of Aṅgiras"[7] etc. He piles up the Hṛdaya-brick with the mantra, "The wise understand (the Ṣaḍḍhotṛ formula) as the golden treasure surrounded by light, holding wealth for the gods, shining, and a particle full of ambrosia. (The commoners) do not know the part of Ṣaḍḍhotṛ (as a particle of moon). The Ṣaḍḍhotṛ formula which fashioned out mentally five seasons, or six seasons, him, functioning ogether with the seasons, the wise deem (as moon) in the realm of the cosmic order.—The gods do not realise (the Ṣaḍḍhotṛ formula) residing within, active, moving within mentally along with the moon, soul of Indra moving in a hundredfold ways, even though he is associaed with them."[8] He then piles up two Yajus bricks respectively with the formulas, "Waters together with the Prokṣaṇīs; governed by that divinity do thou be seated firm in the manner of Aṅgiras. The plants together wit the Barhis; governed by that divinity do thou be seated firm in the manner of Aṅgiras."[9] He piles upto Patnī-bricks respectively with the formulas, "Gāyatrī (is the wife) of the Vasus; governed by that divinity, do thou be seated firm in the manner of Aṅgiras. Triṣṭuk of the Rudras; governed by that divinity do thou be seated firm in the manner of Aṅgiras."[3] At the end of the piling up of all he recites the *sūdadohas* verse.

On the upper part he piles up six Saptahotṛ-bricks respectively with the formulas, "Mahāhavis is the Hotṛ; governed by that divinity do thou be seated firm in the manner of Aṅgiras. Satyahavis is the Adhvaryu; governed by that divinity, do thou be seated firm in the manner of Aṅgiras" etc.[10] Alternatively he piles up two bricks with the formula, "Anādhṛṣya and Apratidhṛṣya are the Prastotṛ and Pratihartṛ of the sacrifice. He recites the *tayādevata* formula combinedly; he modifies it as "Governed by that divinity do you two be seated firm in the manner of Aṅgiras." He piles up the Hṛdaya-brick with the mantras beginning with "Indra the king of the world, who governs-he is the Saptahotṛ formula fashioned in seven ways "and ending with the Anuvāka.[11] He piles up thirteen Yajus-bricks with the formulas, "Aditi together with the Vedi, governed by that divinity do thou be seated firm in

7. TĀ III.6.1
8. TĀ III.11.5
9. TĀ III.8.1
10. TĀ III.5.1
11. TĀ III.3.11

देवतयाङ्गिरस्वद्ध्रुवा सीद सोमो दीक्षया तया देवतयाङ्गिरस्वद्ध्रुवा सीदेति त्रयोदश । अथ पत्नीष्टका उपदधात्यादित्यानां जगती तया देवतयाङ्गिरस्वद्ध्रुवा सीद विष्णोरनुष्टुक्तया देवतयाङ्गिरस्वद्ध्रुवा सीदेत्यष्टादश । सर्वासां पारे सूददोहसः करोति । अथ यथावकाशं ग्रहेष्टका उपदधाति वाचस्पते विधे नामन्निति दशहोतुर्वाचस्पते वाचो वीर्येणेति चतुर्होतुः सोमः सोमस्य पुरोगा इति पञ्चहोतुर्भूर्भुवः सुवरिति षड्ढोतुर्वाचस्पते हृद्विधे नामन्निति सप्तहोतुः । सर्वासां पारे सूददोहसः करोति । अथ यथावकाशमेव प्रतिग्रहेष्टका उपदधाति । देवस्य त्वा

the manner of Aṅgiras; Soma together with Dīkṣā, governed by that divinity do thou be seated firm in the manner of Aṅgiras" etc.[12] He piles up eighteen Patnī-bricks with the formula, "Jagatī is the wife of the Ādityas; governed by that divinity do thou be seated firm in the manner of Aṅgiras; Anuṣṭuk is the wife of Viṣṇu; governed by that divinity do thou be seated firm in the manner of Aṅgiras" etc. upto the end of the Anuvāka.[13] At the end of the piling up of all he recites the *sūdadohas* verse.

He piles up the Graha-bricks[14] as the space may be—that of Daśahotṛ with the formula, "O lord of speech, moulder, designator, may we designate thee; do thou make us known; may the lord of speech partake of Soma; may he grant us wealth svāhā." That of the Caturhotṛ with the formula, "O lord of speech, thou art being offered oblation with well-procured valour of speech; provide the esteemed heaven for this sacrificer; the lord of speech partakes of Soma; may he provide Indra with power, svāhā." That of Pañcahotṛ with the formula, "The Soma (plant) advances towards the Soma (sacrifice); the bright one advances towards the bright one; the Somas have been mixed up for thee, O Indra, fond of fermented drink and responding to the call." That of Ṣaḍḍhotṛ with Bhūr Bhuvaḥ Svaḥ;[15] that of the Saptahotṛ with formula, "O lord of speech, moulder of heart, designator, may we designate thee; do thou make me known, the lord of speech has partaken of Soma," let the divine relation not be broken, nor human, obeisance to heaven, obeisance to earth svāhā."[16] At the end of the pilling up of all, he recites the *sūdadohas* verse.

He piles up ninteen bricks relating to the receiving (of Dakṣiṇās) respectively with the formulas, "In the impulse of god Savitṛ, with the arms of the Aśvins, with the hands of Pūṣan, I receive (the Dakṣiṇā). May king Varuṇa carry thee O divine Dakṣiṇā-gold to Agni,[17] piece of cloth to Soma, cow to Rudra, horse to Varuṇa, human being to Prajāpati, bed to Manu, she-goat to Tvaṣṭṛ, sheep to Pūṣan, mule or ass to Nirṛti, elephant to Himavat, garland and decoration to Gandharvas and Apsarases, grains to Viśve Devas, food to speech, cooked rice to Brahman, waters to Samudra, cart to Uttāna Āṅgirasa, chariot to Vaiśvānara[17]—May I attain immortality through it, (may the Dakṣiṇā act as) a bird to the giver, may it bring happiness to me the receiver, who gave it to whom ? Kāma (gave) to Kāma, Kāma is the giver,

12. TĀ III.3.8
13. TĀ III.3.9
14. to be piled up with the *graha*-portions of the Caturhotṛ formulas.
15. The *Graha* portion of Ṣaḍḍhotṛ formula is *vācaspate'cchidrayā vācā*. TĀ III.3.4.
16. TĀ III.3.5
17. The portion relevant to the Dakṣiṇā out of these seventeen to be received is to be retained in the formula. The bricks are ninteen and the total number of formulas is seventeen. The two remaining formulas are probably the opening portion *devasya tvā* etc. and the closing portion *tenā' 'mṛtatvam aśyām* etc.

सवितुः प्रसव इत्यनुद्रुत्यैषा ते काम दक्षिणोत्तानस्त्वाङ्गिरसः प्रतिगृह्णात्वित्येकान्नविंशशम् । अपि वा गन्धर्वाप्सराभ्यः स्रगलङ्करणे इत्येतेन मन्त्रेण द्वे इष्टके समानतयादेवते उपदधाति । तया देवतयाङ्गिरस्वद्ध्रुवे सीदतमिति मन्त्रं संनमयति। स्वयमातृण्णाभ्यः प्रभृति सिद्धमत ऊर्ध्वम् । संतिष्ठते ब्रह्मचित् ॥ ७ ॥ पञ्चमः ॥

अथ समस्तस्य । प्रसिद्धं क्षेत्रकरणं यथा सावित्रस्यैतावदेव नाना । सावित्रो ऽग्निः प्रथमा चितिर्लोकंपृणा द्वितीया नाचिकेतस्तृतीया लोकंपृणा चतुर्थी ब्रह्मचित्पञ्चमी । सर्वासु चितिषु स्वयमातृण्णा पुरीषान्ताश्चितयः। अग्ने देवां इहावहेत्येताभिः पञ्च चितीरभिमृशति । तं चेत्सौम्ये ऽध्वर उत्तम एव चक्रे चिन्वीत प्राग्दीक्षणीयायै दिवः श्येनीभिर्यजेतोदवसानीयाया अपाघाभिः । सकृत्प्रयुज्य समस्यति । संतिष्ठते समस्तः ॥ ८ ॥ षष्ठः ॥

Kāma is the receiver; (O Dakṣiṇā, do thou enter into the Kāma the ocean; I receive thee by reason of Kāma; O Kāma, this is for thee; O Kāma, this Dakṣiṇā is for thee; may Uttāna of the Aṅgiras gotra receive thee."[18] Alternatively he piles up two bricks with the formula. "Garland and decoration for the Gandharvas and the Apsarases" with a common *tayādevata* formula; in that case he modifies the formula as "Governed by that divinity, do you two be seated firm in the manner of Aṅgiras." The procedure beginning with the pilng up of the naturally perforated stones is as prescribed. The Brahmacit comes to an end.

## XIX.8
### SAMASTA (COMBINED CITI)

Now the rite of the Samasta. The accomplishment of the area is as prescribed for the Sāvitra. This much is different: The first Citi is as the Agni in the Sāvitra. The second Citi is formed by the Lokampṛṇā bricks. The third Citi is as the Nāciketa. The fourth Citi is formed by Lokampṛṇā bricks. The fifth Citi is as in the Brahmacit. The naturally perforated stones are to be piled up in all Citis. The Citis are each to be accomplished with earth. He touches the five layers respectively with the five verses, "O Agni, being born, do thou bring the gods for this sacrificer. Invoker of the gods, thou art worthy of being praised by us.—We have approached with devoted mind the young Agni who, enkindled in his seat, is shining with light inbetween the wide heaven and earth, whom ample offering has been made and who is coming from all sides. (I touch) Agni promoting intelligence, the means of a sacrifice, involving the gods, most pervading and worthy of praise. O Agni, men praise thee and none else, receiving even the least oblation. O Agni, son of Aṅgiras, we deposit thee in the manner of Manu; we enkindle thee in the manner of Manu. Do thou carry oblation to the gods for the sacrificer worshipping gods in the manner of Manu. Agni, kind to all, grants food to people. Gladdened, he approaches for oblation the liberal sacrificer having abundant food."[1]

If one proposes to pile up in a Soma-sacrifice, he should pile up in the last round (of Pravargyopasad). He should perform the Divaḥśyenīṣṭi before the Dīkṣaṇīyeṣṭi, and the Apāgheṣṭi before the Udavasānīyeṣṭi. Having first performed (the Sāvitracayana), one may pile up the Samastaciti The Samastaciti thus come to a conclusion.

18. TĀ III.3.10

1. TBr III.11.6.3-5

अथ वैश्वसृजस्य। प्रसिद्धं क्षेत्रकरणं यथा सावित्रस्यैतावदेव नाना। तिस्रो लेखा भवन्त्यथान्तमायां लेखायामुपदधाति यच्चामृतं यच्च मर्त्यमित्यष्टादश । सर्वासां पारे सूददोहसः करोति । अथाभ्यन्तरायां लेखायामुपदधाति सर्वा दिशो दिक्ष्विति पञ्चदश। सर्वासां पारे सूददोहसः

## XIX.9
### VAIŚVASṚJA

Now, the rite of Vaiśvasṛja Citi. The accomplishment of the area is as prescribed for the Sāvitra. This much is different: There are three lines. On the last line he piles up eighteen bricks respectively with the formulas, "That which is immortal, which is mortal, which breathes and which does not—I deem all of them to be bricks yielding desires and pile them up. Governed by that Ṛṣi, that prayer and that divinity, do thou be seated firm in the manner of Aṅgiras. —All females, all males and all neuters —I deem all ... —All that are the dust-particles enumerated by the divine power I deem all ... —All that are the particles of saline soil on the earth nourishing the cattle—I deem all ... —All the sand-particles lying within the waters—I deem all ...— All the pebbles which exist for the sustenance of the earth—I deem all ... —All the stones which are set on the hard surface of the earth—deem all ... —All the creepers which lie on the earth-I deem all ..— All the plants which grow on the earth—I deem all ... —All the trees which grow on the earth—I deem all...—All the domestic and wild animals I deem all ... —All the bipeds, quadrupeds, footless and crawling—I deem all ... —Whatever collyrium is employed among the gods and men—I deem all ... —Whatever iron exists among the gods and men—I deem all ...— All copper which lies among the gods and men—I deem all ... —All lead, all tin that exists among gods and men—I deem all ... —All bright silver which exists among the gods and men...—All bright gold which exists among the gods and men I deem all of them to be bricks yielding desires and pile them up. Governed by that Ṛṣi, that prayer and that divinity, do thou be seated firm in the manner of Aṅgiras."[1]

On the inner line he piles up fifteen bricks respectively with the formulas. "All quarters and whatever is set within those quarters—I deed all of them to be desire-yielding bricks, and pile them up. Governed by that Ṛṣi, that prayer and that divinity, do thou be seated firm in the manner of Aṅgiras. The hollow midregion and all that is set therein—I deem all ... —The progeny living in the midregion, and the Gandharvas and the Apsarases - I deem all ...— All enormous clouds set in the midregion—I deem all ... —All big water-reservoirs which are steady and also moving—I deem all ... —All torrents, all waterfalls and snowfall—I deem all ... —All spreading rays and the fog - I deem all ...— All lightning, thunders and hails - I deem all ...—All flowing rivers and all aquatic animals—I deem all ... —Those waters which are obtained from a well, from a river, from an ocean, from a pond and from a cloudburst—I deem all ... —The clouds which rush up, the showers which fall down—I deem all ... —The heat, brilliance, the sky, that which is set in the sky—I deem all....—The wind, the birds and everything that flies in the sky—I deem all...—Agni, Sūrya, Candra, Mitra, Varuṇa, Bhaga—I deem all ...— Truth, faith, penance, restraint, designation and form of creatures—I deem all these to be desire-yielding bricks, and pile them up. Governed by that Ṛṣi, that prayer and that

1. TBr III.12.7

करोति। अथाभ्यन्तरायां लेखायामुपदधाति सर्वान्दिवः सर्वान्देवान्दिवीति नव। सर्वासां पारे सूददोहसः करोति। स्वयमातृण्णाभ्यः प्रभृति सिद्धमत ऊर्ध्वम्। तं चेदहीने सत्रे वा चिन्वीत शतरात्रे विश्वजिति सर्वपृष्ठे दक्षिणानां काले ब्रह्मा सदस्यासीनो वैश्वसृजान्व्याचष्ट ऋचां प्राची महती दिगुच्यत

divinity do thou be seated firm in the manner of Aṅgiras."[1] At the end of the piling up of all, he recites the *Sūdadohas* verse.

On the still inner line he piles up nine bricks respectively with the formulas, "The entire heaven, all gods, and everything that is set in the heaven—I deem all these to be desire-yielding bricks and pile them up. Governed by that Ṛṣi, that prayer and that divinity, do thou be seated firm in the manner of Aṅgiras. ...—All stars which are spread over the wide sky—I deem all ... —The Ṛks, Yajus, Sāmans and Atharvāṅgiras mantras-I deem all ... —Itihāsa and Purāṇa, serpents and groups of demons—I deem all ... —Those which are the worlds, improper worlds and the creatures which are set within the worlds—I deem all ... —The sacred knowledge, the non-sacred knowledge and that which is covered by the sacred knowledge—I deem all ... —All days and nights and the stray fortnights-I deem all ... —All seasons, all months and a stray year, I deem all ... —All the past, the present and the future—I deem all these to be desire-yielding bricks and I pile them up. Governed by that Ṛṣi, that prayer and that divinity, do thou be seated firm in the manner of Aṅgiras."[2] At the end of the piling up of all he recites the *sūdadohas* verse. The procedure upto the piling up of the naturally perforated stones is as prescribed.

If one piles up the Vaiśvasṛja in an Ahīna sacrifice or a Sattra (upto the) Śatarātra, the Brahman seated in the Sadas in the Viśvajit Sarvapṛṣṭha sacrifice, recites, at the time of giving away the Dakṣiṇās the Vaiśvasṛja mantras[3] beginning with *ṛcām prācī mahatī dig ucyate* by quarters and verse-halves, and the Brāhmaṇa-portions by sentences :

(i) "The east is said to be the venerable quarter adorned by (the divinity governing) the Ṛks. The south is said to be the esteemed quarter of the Yajuses. The west is that of the Atharvans and the Aṅgirases. The north is the venerable quarter of the Sāmans.

(ii) The god (Āditya) moves in the early part of the day together with (divinity of) the Ṛks. At midday he stands together with the Yajuses. In the evening he is worshipped together with the Sāmans. (In this way) Sūrya moves in company with the three Vedas.

(iii) The form (of Sūrya) is said to be entirely born of the Ṛks. All movement is absolutely from the Yajuses. All (his) lustre is derived absolutely from the Sāmans. All this (belonging to Sūrya) is erected together with the sacred knowledge.

(iv) The Vaiśya class is said to have been born of the Ṛks. Yajurveda is said to be the birth-place of the Kṣatriya class. Sāmaveda was the birth-place of the brāhmaṇa class. The old sages uttered this saying to the old persons.

2. TBr III.12.8
3. TBr III.12.9

इति पच्छो ऽर्धर्चशो ब्राह्मणे वाक्यशः । तस्मा अध्वर्युः प्रतिगृणात्यों ब्रह्मन् ऋतं ब्रह्मन् सत्यं ब्रह्मन्नरात्स्म ब्रह्मन्निति । तस्योत्तमे पर्याये ऽरात्स्म ब्रह्मन् संपद्यते । संतिष्ठते वैश्वसृजः ॥ ९ ॥ सप्तमः ॥

(v) The ancient gods intending to create the universe (and therefore) piling up the great Agni, became initiated and sat for the sacrificial session lasting for a hundred thousand years.

(vi) When they commenced the Sattra for creating the universe, Tapas itself was the Gṛhapati. The collection of sacred mantras itself became the Brahmán priest. The truth became the Hotṛ.

(vii) The ambrosia functioned as the Udgātṛ for them for a thousand Parivatsaras. The past became their Prastotṛ. The future functioned as the Pratihartṛ.

(viii) For (the gods) intending to sit for the entire session Prāṇa became the Adhvaryu. The wise Apāna chosen for the sacrifice officiated as the Pratiprasthātṛ.

(ix) Those belonging to the seasons became the Upagātṛs. The seasons became the Sadasyas. The fortnights and the months became the Camasādhvaryus.

(x) When the Viśvasṛj gods sat for the sacrificial session, the lustre functioned as the Brāhmaṇācchaṁsin. Their glory became the Acchāvāka. The cosmic order became the Praśāstṛ.

(xi) When the Viśvasṛj gods performed the Sattra, their essence carried (i.e. held) king Soma.[4] Their might functioned as the Dhruvagopa.[5] Their vigour praised the pressing stones.[6]

(xii) Their recompensation recited the Potṛ's yājyā. Their splendour recited the Neṣṭṛ's yājyā. Their śraddhā, knowing the truth, recited the Āgnīdhra's yājyā.

(xiii) The sacrificial food of the Viśvasṛj gods functioned as the sacrificer's wife. Their intention crushed the oblation-material. The acute hunger and thirst procured the sacrificial faggot.

(xiv) Their speech, being aware of the compositions of metres, operating the various procedures of rituals and types of Soma-sacrifices, became the Subrahmaṇyā.

(xv) Day and night became the guardians of the sacrificial animal. The Muhūrtas became the servants. The creator became the death. The lord of the people became the immolator.

(xvi) The early Viśvasṛj gods sat in a Sattra lasting for a thousand years pressing Soma every day. Consequently was born the golden bird, called Brahman, the guardian of the universe.

4. served for the stool (*āsandī*)
5. guardian of the Dhruva vessel.
6. officiated as the Grāvastut priest.

एतेनारुणकेतुको व्याख्यातः । यावन्मन्त्रमबीष्टका लोकंपृणाश्च स्वयमातृण्णाश्चाप एव पुष्करपर्णं रुक्मं हिरण्मयं पुरुषं कूर्ममिति । आतपति वर्ष्या इति यथासमाम्नातम् । पल्वल्या इत्यविशोष्या इत्यर्थः । उत्तरवेद्यापवनकाले तां तूष्णीं जानुदघ्नीं खात्वान्यत्र मृदं निवपति । विदेरग्निरित्यादि लुप्यते । ध्रुवासीति प्रतिपद्यते । हस्तग्राहमबीष्टका उपदध्यात् । भद्रं कर्णेभिरिति द्वाभ्यां शान्तिं कृत्वा ताभ्यामुपदधाति । आपमापामिति पञ्चभिर्महानाम्नीभिरुष्णोदकम् । शिवा वः शन्तमेति सौषध्यो ऽपो ऽध्वर्यवे ददाति । स ताः प्रतिगृह्य शिवा न इत्युपदधाति ।

(xvii) By whose prowess the sun furnished with splendour shines; at every birth the father attains parenthood through a son. One who has not studied the scripture does not realise that Almighty, the great, the soul residing in all, at death.

(xviii) This is the eternal greatness of one who knows Brahman. By resorting to religious act he neither increases nor decreases. His self becomes cognisant of the eternity. Having cognised Him one does not become stained with evil act."

The Adhvaryu responds to him by saying "Om Brahman,[7] the right O Brahman,[7] the truth O Brahman,[7] we have attained O Brahman."[7] In the last round the response is "We have attained O Brahman."[7] The rite of the Vaiśvasṛja thus comes to a conclusion.

## XIX.10

### ĀRUṆAKETUKA

Hereby is explained theĀruṇaketuka Cayana. As many water-bricks are to be piled up as there are the formulas. The Lokampṛṇā-bricks and the naturally perforated stones are also water-bricks. (One procures) a lotus-leaf, a gold sheet, a golden man and a tortoise. (One also procures) rainwater while there is sunshine as is prescribed in the scripture.[1] The waters in a pond mean those which do not dry up. At the time of the raising of the Uttaravedi one digs out earth as deep as the knee silently, and pours it down elsewhere. The employment of the formula *vider agnir nabho nāma* ... is dropped.[2] He begins the further procedure with the formula *dhruvā'si*.[3] He should pile up water-bricks by means of the palm. He invokes Śānti by reciting the two verses, "O gods, may we listen auspicious things with our ears; O gods worthy of sacrifice, may we see auspicious things with our eyes. Praising you with firm limbs, may we attain the life destined by gods.—May Indra of great fame be auspicious to us. May Pūṣan knowing all be auspicious to us. May the eagle Ariṣṭanemi be auspicious to us. May Bṛhaspati grant us welfare."[4] With these very verses he piles up the bricks. He piles up warm water with the five Mahānāmnī verses: "I have obtained again and again all waters from this and that place from this world and from yonder. I accomplish (them) for prosperity together with Agni, Vāyu and Sūrya. (O you waters), who have wind for the horse, sun-rays for the

7. Caland reads *bṛhat* at four places. The reading *brahman* as found in a manuscript is the correct one.

1. cf. BaudhŚS XII.8
2. cf. BaudhŚS IV.2
3. With this formula he presses the ground. cf. BaudhŚS IV.2.
4. TĀ I.1.1

सुमृडीकेति भूमिवतीमुपदध्यादेताः पुरस्तात् । स्मृतिः प्रत्यक्षमित्यष्टौ मध्ये शुक्रं ते अन्यदिति च । साकंजानामित्येकादश पुरस्ताद्दक्षिणतो ऽक्षिदुःखोत्थितस्यैवेति षडिहेह वः स्वतपस इति चातिताम्राणीति चतस्रो मदन्तीस्तप्ताः प्रवर्ग्यवदाद्यन्तयोः शान्तिं कृत्वा । अत्यूर्ध्वाक्ष इति त्रीण्यृतुमण्डलान्यव द्रप्स इति च । अरोग इत्यष्टौ सूर्यनामभिः पदशो यत्ते शिल्पमिति च । व्याहृतीर्जपित्वापो व इति यजमान उपतिष्ठते । एवमुत्तरैरुपस्थानं व्याहृतीर्जपित्वा । सप्त सूर्याः सप्त दिशो नानासूर्या यद् द्यावश्चित्रं देवानामिति चतस्रः सौरीः पुरस्तात् क्वेदमभ्रमित्येकाम् ।

guardians, formed of particles of light, divine impellers of creatures, do me the favour of parenthood. Having great name, highly honoured, promoters of favourable things, divine impellers ... —O divine waters, do you dispel from here the consuming and burning fire, the velocity, the sin, and the poverty. —O divine waters, promoting the gods, do you elevate the thunderbolt, elevate us uninjured, elevate the creation. Elevate the Ādityas and Aditi as the cause (of our prosperity)."[5] The sacrificer gives away to the Adhvaryu water together with plants with the verse-half, "May the divine waters and plants become auspicious and pleasant to us."[6] He receives them and piles them up with the (same) formula, "May the divine waters and plants become auspicious and pleasant to us." In front of these he piles up the Bhūmivatī brick with the formula, "O Sarasvatī, do thou be pleasant to us. Let thy cavity not be visible."[6]

He piles up eight bricks in the middle with eight verses beginning with, "Memory, manifest, legendary, inference - this is the fourfold means of cognition-with all these the solar circle is assessed. —The sun holds ray of light above the entire creation. Through the specific maturity of the creation caused by it the specific divisions of time are obtained. —A river flows from an inexhaustible spring. Other rivers flow into it. Becoming wide, she never returns (to the original form).—Similarly various dimensions of time, big and small, resorting to a year unite with it. —The year covering all those dimensions becomes wide; it never returns. Therefore one should understand (the universe) to be depending upon the year in regard to the definition (of time). —The year appears directly comprising small and big dimensions. One who supercedes the beings (however) does not become visible. Paṭara, Viklidha, Piṅga-these are Varuṇa's forms. When this is known, a thousand (cows) are carried. —There is one head and two mouths; that defines the seasons. There are seven organs on each side. The utterance is besmeared (?). He also piles up a brick with the verse, "O Pūṣan, thy bright form is one; thy venerable form is another. Thou producest two opposite things—day (and night). Thou art heaven as if. O possessor of food, thou causest all powers. May thy auspicious gift be here."[1]

He piles up eleven bricks towards the east respectively with the verses :

(i) Among the rays of the sun born together the seventh is said to have been born as the first the (other) six (seasons) are shining ropes born of the god

5. TĀ I.2.1-3
6. TĀ I.2.3
7. TS IV.1.11.2; TĀ I.2.4

अर्धमासा इत्युपरिष्टात्काला अप्सु निविशन्त इति द्वे दक्षिणतः किं स्विदत्रेति पञ्च वैष्णवीः पृच्छामि त्वा परं मृत्युमिति चतस्रो मृत्युमतीः पृच्छामि त्वा पापकृत इति चतस्रो निरयवतीरा यस्मिन्नग्रे नयेति द्वे अग्निश्च जातवेदाश्चेत्यष्टौ दिश्या दिशो व इति यजमानः प्रभ्राजमाना इत्येकादश रुद्राः प्रभ्राजमान्य इत्येकादश रुद्राण्यः पदशो मध्ये रूपाणि व इति यजमानः स्वानभ्राडित्येकादश गन्धर्वगणाः पदशः पश्चाद्गौरी मिमायेत्येका वराहवः स्वतपस इति सप्त वाताः पदशः समानमेतदिति वृष्टिमती यदक्षरमिति लोको जमदग्निरित्याप्यायितस्तच्छंयोरिति शंयुः सहस्रवृदित्यष्टौ संयानीः स संग्राम इति द्वे पवित्रवन्तः पवित्रं ते ब्रह्म देवानामसतः सद्य इति चतस्रः पवित्रवत्य उत्तरतो ऽमी य ऋक्षा इति सप्त मध्ये ऽन्धो

(Āditya). Their assigned destinations have been created. They function variously for the maintenance of the world.

(ii) O men, which friend among you, not disturbed, said to his friend: "afraid of damage from us, he escapes."

(iii) One who left away the friend enjoying friend ...[8]

(iv) A season being impelled by the (preceding) season takes its course producing appropriate sound. The groups of thirty each make sixty (in each season). The bright and dark fortnights make a part of sixty.

(v) The spring having an old car and accompanied by the Vasus wearing coloured garments is said to be the first attendant of the year-the master.

(vi) "Feed these, take care of these" —these talks take place at that time when the spring appears.

(vii) One should understand the same order in regard to the change of season. We shall explain the specific characters of the seasons. Listen to them.

(viii) The group of Rudras wearing white garments arrives together with the summer, scorching the entire earth with unparalled heat.

(ix) Do you have a look at the variegated garments of the Ādityas yielding annual crops in association with rainy season.

(x) The season, even though void of grief causes eye-trouble, looks yellow as if. Not causing severe cold, it appears active through antelopes.

(xi) It gladdens the people afflicted by scorching heat. Eyes of the world become calm. The people who miss (this season in farming) miss the whole year.

